केचिद्दिव्याङ्गनाहस्तन्यस्तचामरवायुभिः ।
गच्छन्ति वीजिता मर्त्याः स्तूयमानाः सुरर्षिभिः ॥
केचिद्दिव्याङ्गनधराः सुचन्दनविभूषिताः ।
भुञ्जन्तो यान्ति ताम्बूलं पुण्यात्मानो यमालयम् ॥
निजगात्रत्विषा केचिज्ज्वालयन्तो दिशो दश ।
व्रजन्ति शमनागारं चलद्गृहनिवासिनः ॥
केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः ।
सुधापानं प्रकुर्व्वन्तः पथि गच्छन्ति केचन ॥
केचिद्दुग्धं पिबन्तश्च केचिदिक्षुरसं तथा ।
केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् ॥
केचिद्दधीनि खादन्तः केचिन्नानाफलानि च ।
केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै ॥
तानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान् ।
भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत् ॥
चतुर्ब्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुड़वाहनः ॥
स्वर्णयज्ञोपवीती च स्मेरचारुतराननः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥
चित्रगुप्तो महाप्राज्ञश्चण्डाद्या यमकिङ्कराः ।
सर्व्वे नारायणाकारा बभूवुर्मधुरोक्तयः ॥
ततः स्वयं धर्म्मराजस्तान् सर्व्वान्मनुजोत्तमान् ।
परमां प्रीतिमासाद्य मित्रवत् पूजयेद्द्विज ! ॥
दिव्यैरन्यैः फलैश्चैव तेषां पुण्यवतां नृणाम् ।
भोजनं कारयित्वा तु तानुवाचाथ भास्करिः ॥
यम उवाच ।
यूयं सर्व्वे महात्मानो नरकक्लेशभीरवः ।
निजपुण्यप्रभावेन गम्यतां परमं पदम् ॥
संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः ।
स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत् ॥
इत्युक्ता धर्म्मराजेन ते सर्व्वे द्विजसत्तम ! ।
दिव्यं रथं समारुह्य नारायणपुरं ययुः ॥”
इति पाद्मोत्तरे क्रियायोगसारे २२ अध्यायः ॥

पुण्याहं, क्ली, ( पुण्यञ्च तदहश्चेति । “राजाहः-सखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् । “उत्तमैकाभ्याञ्च ।” ५ । ४।९० । इति अह्नादेशो न । ) पुण्यदिनम् । इत्यमरः ॥ ( यथा, अमरुशतके । ६१ ।
“पुण्याहं व्रजमङ्गलं सुदिवसं प्रातः प्रयातस्य ते यत्स्नेहोचितमीहितं प्रियतम ! त्वं निर्गतः श्रोष्यसि ॥” )

पुण्याहवाचनं, क्ली, ( पुण्याहस्य वाचनम् । ) दैवादिकर्म्मादौ मङ्गलार्थं पुण्याहमितिशब्दस्य वारत्रयकथनम् । यथा,—
“पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्त्रियवैश्ययोः ॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥”
इत्युद्वाहतत्त्वे यमः ॥

पुत्त, गतौ ॥ ( भ्वा-परं-सकं-सेट् । ) तदयान्तः । पुत्तिका । सौत्रधातुरयम् । इति दुर्गादासः ॥

पुत्तलकः, पुं, (पुत्त गतौ+भावे घञ् । पुत्तं गमनं लाति अन्यस्मादिति । ला+कः । ततः संज्ञायां कन् । अन्याश्रयेणैव हि गमनादिक्रियावत्त्वादस्य तथात्वम् । ) पत्रादिनिर्म्मितप्रतिमूर्त्तिः । पुतुल इति भाषा । यथा, “आचारात् योग्यत्वाच्च शरपत्रैः पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि देयानि ।” इति शुद्धितत्त्वम् ॥

पुत्तलिका, स्त्री, तृणकाष्ठस्वर्णधातुरत्नादिनिर्म्मितप्रतिमूर्त्तिः । पुत्तली एवेति स्वार्थे कनि ईकारस्य ह्रस्वे टापि निष्पन्ना ॥

पुत्तली, स्त्री, ( पुत्तं गमनं लाति अन्याश्रयेणेति । ला+कः । ततो ङीष् । ) मृदादिनिर्म्मितप्रतिमूर्त्तिः । यथा, उत्तरकामाख्यातन्त्रे ॥
“अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः ।
मृण्मयीं पुत्तलीं कृत्वा दीपादिभिरलङ्कृताम् ॥”

पुत्तिका, स्त्री, ( पुत्तं इतस्ततो भ्रमणमस्त्यस्या इति । पुत्त+ठन् । ततष्टाप् । ) मधुमक्षिकाविशेषः । तत्पर्य्यायः । पतङ्गिका २ । इत्यमरः । २ । ५ । २७ ॥ ( पिपीलिकाप्रभेदः । यथा, मनुः । ४ । २३८ ।
“धर्म्मं शनैः सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्व्वभूतान्यपीड़यन् ॥” )

पु(त्र)त्रः, पुं, लग्नात् पञ्चमस्थानम् । यथा,—
“पुत्रस्थेऽर्क्के नरोऽसौ प्रथमसुतहतः सिंहराशौ सुपुत्रः ॥”
इत्यादि ज्योतिस्तत्त्वम् ॥
( पुनाति पित्रादीनिति । पू+“पुवो ह्रस्वश्च ।” उणा० ४ । १६४ । इति क्तः धातोर्ह्रस्वत्वञ्च । तकारद्वये तु पुन्नामनरकात् त्रायते इति । पुत्+त्रै+डः । पितॄन् पातीति व्युत्पत्त्या पृषोदरादित्वात् साधुः । इति रामायणे ।२।१०७।१२ । श्लोकटीकायां रामानुजः ।) पुंसन्तानः । पुन्नामनरकत्राता । पुत इति बेटा इति च भाषा । तत्पर्य्यायः । आत्मजः २ तनयः ३ सूनुः ४ सुतः ५ । इत्यमरः । २ । ६ । २७ ॥ तनूजः ६ अपत्यम् ७ दायादः ८ कुलाधारकः ९ नन्दनः १० आत्मजन्मा ११ द्वितीयः १२ प्रसूतिः १३ स्वजः १४ । इति शब्दरत्नावली ॥ अस्य निरुक्तिर्यथा,—
“पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥”
इति महाभारते । १ । ७४ । ३७ ॥
( यथा च रामायणे । २ । १०७ । १२ ।
“पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः पितॄन् यः पाति सर्व्वतः ॥”)
स च द्वादशविधः यथा,—
“औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढ़ोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा ।
स्वयन्दत्तश्च शौद्रश्च षड़दायादबान्धवाः ॥”*॥
तेषां लक्षणानि यथा,—
“स्वे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम् ।
तमौरसं विजानीयात् पुत्त्रम्प्रथमकल्पितम् ॥१॥
यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥२॥
माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ॥३॥
सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् ।
पुत्त्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥ ४ ॥
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ़ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥५॥
मातापितृभ्यामुत्सृष्टन्तयोरन्यतरेण वा ।
यं पुत्त्रं परिगृह्णीयादपविद्धः स उच्यते ॥ ६ ॥
पितृवेश्मनि कन्या तु यं पुत्रञ्जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढ़ुः कन्यासमुद्भवम् ॥७॥
या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती ।
वोढ़ुः स गर्भो भवति सहोढ़ इति चोच्यते ॥८॥
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥९॥
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते ॥१०॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्मै स्वयं दत्तस्तु स स्मृतः॥११
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत् सुतम् ।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः ॥१२॥
क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥”
इति मानवे ९ अध्यायः ॥ * ॥
चतुर्व्विधपुत्त्रा यथा,—
सुमना उवाच ।
“ऋणसम्बन्धिनः केचित् केचिन्न्यासापहारकाः ।
रिपवश्च प्रियाश्चेति स्वकर्म्मवशवर्त्तिनः ॥
भेदैश्चतुर्भिर्जायन्ते पुत्त्रा मित्राः स्त्रियस्तथा ।
भार्य्या पिता च माता च भृत्याः स्वजनबान्धवाः॥
स्वेन स्वेन हि जायन्ते सम्बन्धेन महीतले ।
न्यासापहारभावेन यस्य यस्य कृतं भुवि ॥
न्यासस्वामी भवेत् पुत्त्रो गुणवान् रूपवान् भुवि ।
येन चापहृतं न्यासं तस्य गेहे न संशयः ॥
न्यासापहरणाद्दुःखं स दत्त्वा दारुणं गतः ।
न्यासस्वामी स पुत्त्रोऽभून्न्यासापहारकस्य च ॥
गुणवान् रूपवांश्चैव सर्व्वलक्षणसंयुतः ।
भक्तिञ्च दर्शयेत्तस्य पुत्त्रो भूत्वा दिने दिने ॥
प्रियवाक्यधरो वापि बहुस्नेहं प्रदर्शयेत् ।
स्वीयं द्रव्यं समुद्राढ्यं प्रीतिमुत्पाद्य चातुलाम् ॥
भुक्त्वा तु पोषणान्तेन तदादाय पुनर्व्रजेत् ।
यथा तेन प्रदत्तं तन्न्यासापहरणात् पुरा ॥
दुःखमेवं महत् कृत्वा दारुणं प्राणनाशनम् ।
तादृशं तस्य दद्यात् स पुत्त्रो भूत्वा महागुणैः ॥
अल्पायुषस्तथा भूत्वा मरणं यान्ति ते तथा ।
दुःखं दत्त्वा प्रयान्त्येवं प्रकृत्यैवं पुनः पुनः ॥
यदाह पुत्र पुत्त्रेति प्रलापं हि करोति सः ।
तदा हास्यं करोत्येव कः स पुत्त्रो हि कस्य च ॥
अनेनापि कृतं न्यासं मदीयं परिचारिणा ।
द्रव्यापहारोऽपि पिता पूर्व्वमदैव तस्य च ॥
पिशाचत्वं मया दत्तमद्यैव हि दुरात्मनः ।